# १ कथं, कदा कुत्र च ?

## दिनाङ्काः कियन्तः महत्त्वपूर्णाः भवन्ति ?

कश्चन कालः आसीत् यदा इतिहासकाराः दिनाङ्कानाम् एव इन्द्रजाले निमग्नाः भवन्ति स्म । कदा कः राजा राजसिंहासनम् अलङ्कृतवान् ? कदा किं युद्धम् अभवत् ? – प्रायः एतादृशीनां घटनानां विषये एव चर्चाः भवन्ति स्म । जनसामान्यस्य मान्यतानुसारम् इतिहासः दिनाङ्कानां पर्यायभूतः इति एव मन्यते स्म। भवद्भिः जनाः परस्परम् वार्त्तालापं कुर्वन्तः श्रुताः स्युः । उदाहरणार्थं कश्चित् वदति– श्रीमन् ! इतिहासः तु बहुजाड्यं जनयति। "केवलं दिनाङ्कान् रटन्तु" इत्येव तत्र करणीयं भवति। किम् इतिहासस्य विषये एषा धारणा समीचीना अस्ति ?

अत्र कोऽपि सन्देहः नास्ति यत् इतिहासः पृथक् पृथक् काले जातानां परिवर्तनानां विषये एव भवति इति । अभिप्रायः अयम् अस्ति यत् अतीत-काले वस्तूनि कीदृशानि आसन् ? तेषु वस्तुषु च अधुना कानि कानि परिवर्तनानि जातानि ? उदाहरणार्थं यदा वयम् अतीत-वर्तमानयोः विषये परस्परं तुलनां कुर्मः, तदा वयं दिनाङ्कस्य एव वर्णनं कुर्मः। वयम् अतीतस्य परवर्तिकालस्य च विषये चर्चां कुर्मः।




**चित्रम् १** – ब्राह्मणाः ब्रिटेनियामहोदयायै उपहारस्वरूपं शास्त्रं ददति,जेम्सरेनेलद्वारा सज्जीकृतस्य प्रथमस्य चित्रस्य आवरणचित्रम्, १७८२।

राबर्टक्लाइवः रेनेलवर्याय हिन्दुस्तानस्य मानचित्रस्य चित्ररचनायाः कार्यं समर्पितवान्। भारतस्य उपरि आङ्ग्लीयानां विजयस्य समर्थकः रेनेलवर्यः मन्यते स्म यत् भारतम् अधिग्रहीतुं मानचित्ररचनं किञ्चित् महत्त्वपूर्णं कार्यम् अस्ति इति । एतस्मिन् चित्रे दर्शितम् अस्ति यत् कथं भारतीयाः स्वेच्छापूर्वकं स्वप्राचीनान् पवित्र-ग्रन्थान् ब्रिटिशसत्तायाः प्रतीकभूतायै ब्रिटेनियायै समर्पितवन्तः । अस्मिन् चित्रे भारतीयब्राह्मणाः ग्रन्थान् समर्पयन्तः इत्थं दृश्यन्ते यत् ते ब्रिटेनियावर्यां भारतीयसंस्कृतेः रक्षार्थं साग्रहम् अत्र आगन्तुं कथयन्तः स्युः इति।

दैनन्दिनजीवने वयं स्वपार्श्वस्थानां वस्तूनां विषये प्रायः ऐतिहासिक-प्रश्नान् न कुर्मः । वयं वस्तूनि स्वाभाविकानि सन्ति इति मत्वा व्यवहरामः, उदाहरणार्थं यत् किमपि वयं पश्यामः तस्मिन् विषये अस्माकम् अनुभूतिः भवति यत् एतत् सर्वं सर्वकालात् एतादृशम् एव स्याद् इति । परन्तु अस्माकं सर्वेषां समक्षे कदाचित् आश्चर्यजनकाः अवसराः अपि आयान्ति। बहुधा वयं समुत्सुकाः भवामः, एतादृशान् प्रश्नान् च पृच्छामः, ये प्रश्नाः वास्तविकतायाम् ऐतिहासिकाः भवन्ति इति । राजमार्गस्य पार्श्वे भवन्तः चायपानं कुर्वन्तं जनं दृष्ट्वा कदाचित् विचारितवन्तः स्युः यत् चायपानस्य कफघ्नीपानस्य (काफी) च प्रचलनं कदा आरभ्य जातं स्यात् ? इति। रेलयानस्य गवाक्षात् बहिः पश्यतां भवतां मनसि एषः प्रश्नः उदेतुं शक्नोति यत् "रेलवे" संस्थायाः निर्माणं कदा अभवत् ? इति। रेलयानस्य प्रचलनात् प्राक् जनाः देशात् देशान्तरं प्रति यात्रां कथं कर्तुं पारयन्ति स्म ? प्रातःकाले वार्त्तापत्रं पठन्तः भवन्तः इदं ज्ञातुं समुत्सुकाः भवितुं शक्नुवन्ति यत् यस्मिन् काले वार्त्तापत्राणि न प्रकाश्यन्ते स्म, तस्मिन् काले जनाः विविधघटनानां विषये कथं सूचनाः प्राप्नुवन्ति स्म ? इति।

| ➢ गतिविधिः |
| --- |
| प्रथमं चित्रं सावधानं पश्यतु। इदं चित्रं कम् उपनिवेशवादं बोधयति। |

एते सर्वे ऐतिहासिकप्रश्नाः अस्मान् कालस्य विषये चिन्तयितुं प्रेरयन्ति । कालः सदैव वर्षस्य मासस्य च परिमापकत्वेन एव न द्रष्टुं शक्यते । कदाचित् एतादृशीनाम् इतिहास-सूचक-प्रक्रियाणां कृते कस्यचित् दिनाङ्कस्य निर्धारणं वास्तविकतायाम् एव असमीचीनं भवति, याः इतिहाससूचकप्रक्रियाः चिरकालं यावत् चलन्ति इति । भारते एकस्मिन् दिने सहसा एव प्रातःकाले जनाः चायपानं न आरब्धवन्तः । जनेषु चायपानस्य आस्वादनप्रवृत्तिः शनैः शनैः अजायत । एतादृशीनां घटनानां कृते काचित् स्पष्टा तिथिः न भवितुं शक्नोति । अनेन एव प्रकारेण वयं ब्रिटिशशासनस्य स्थापनार्थम् अपि कामपि एकां तिथिं न ज्ञापयितुं शक्नुमः । राष्ट्रियान्दोलनं कस्मिन् दिने आरब्धम् ? तथा च अर्थव्यवस्थायां समाजे च कस्मिन् दिने परिवर्तनानि जातानि ? इत्यस्मिन् विषये अपि इदम् इत्थमतया न ज्ञापयितुं शक्यते । एताः सर्वाः घटनाः कस्मिंश्चित् दीर्घावधौ घटन्ते । एतस्याम् अवस्थायां वयं कस्यचित् अवधिविषये एव वक्तुं शक्नुमः, यस्मिन् अवधौ एतानि विशिष्टानि परिवर्तनानि दृष्टिपथम् आगन्तुम् आरब्धानि स्युः ।




**चित्रम्** २ – विज्ञापनैः रुचेः अरुचेश्च निर्धारणं भवति ।

वयं पुरातन-विज्ञापनेभ्यः इदं तथ्यम् अवगन्तुं साहाय्यं प्राप्नुमः यत् नूतनानाम् उत्पादानां कृते महाहट्टाः कथं सज्जाः जाताः ? इति, कथं नूतन-रुचयः प्रचलने आगताः ? द्वाविंशत्यधिकैकोनविंशतिशत-तमे वर्षे (१९२२) "लिप्टन"चायस्य कृते रचितम् इदं विज्ञापनं एतत् तथ्यं सङ्केतयति यत् आविश्वं सम्राजः इदमेव चायं पिबन्ति इति । एतस्य चित्रस्य पृष्ठस्थे भागे कश्चित् भारतीयप्रासादः दृश्यते, तत्र च अग्रिमभागे ब्रिटेनस्य सम्राज्ञ्याः विक्टोरियायाः तृतीयः पुत्रः राजकुमार "आर्थरः" अश्वे उपविष्टः अस्ति । राजकुमारार्थराय ड्यूक आफ कनाट इति उपाधिः प्रदत्तः आसीत् ।

पुनः जनाः इतिहासं दिनाङ्कानां परिप्रेक्ष्ये किमर्थं पश्यन्ति ? एतस्याः दृष्टेः किञ्चित् कारणम् अस्ति । कश्चन कालः आसीत् यदा युद्धविषयकप्रसङ्गाः महतीनां घटनानां वृत्तान्ताः चैव इतिहासत्वेन मन्यन्ते स्म । अयम् इतिहासः राज्ञां महाराजानां तेषां नीतीनां च विषये भवति स्म । इतिहासकाराः वर्णयन्ति यत् असौ राजा कस्मिन् वर्षे सिंहासनारूढः सञ्जातः ? कस्मिन् वर्षे राज्ञः विवाहः अभवत् ? । कस्मिन् वर्षे तस्य गृहे शिशुः अजायत ? कस्मिन् वर्षे सः कतमं युद्धम् अकरोत् ? सः कदा अम्रियत ? तस्य राजानः मृत्योः पश्चात् कः राजा राजसिंहासनम् आरूढवान् ? एतादृशीनां युद्धादिघटनानां कृते निश्चिततिथिः ज्ञापयितुं शक्यते इति, एतादृशेषु ऐतिहासिकप्रसङ्गेषु च तिथीनां महत्त्वम् अक्षुण्णम् तिष्ठति । यथा भवद्भिः गतद्वयोः वर्षयोः इतिहासस्य पुस्तकेषु दृष्टम् अस्ति, तथा अधुना इतिहासकाराः बहूनां विभिन्नानां प्रश्नानां विषयानां च उपरि अपि लेखितुम् आरब्धवन्तः । ते इतिहासकाराः अस्मिन् विषये अपि दत्तावधानाः भवन्ति यत् जनाः केन प्रकारेण स्वीयाम् आजीविकां चालयन्ति स्म । ते कानि सस्यानि उत्पादयन्ति स्म ? किं च भुञ्जते स्म ? । नगराणि कथं जातानि ? महाहट्टाः कथं विकसिताः ? कथं राज्यानि जातानि ? नूतनविचाराणां विकासः कथं जातः ? संस्कृतिः समाजः च कथं परिवर्तितौ ?

## के दिनाङ्काः ?

केचन दिनाङ्काः महत्त्वपूर्णाः सन्ति इति अत्र महत्त्वं निश्चेतुं कः मानदण्डः भवति ? येषां दिनाङ्कानां वयं चयनं कुर्मः, येषां दिनाङ्कानां च परिप्रेक्ष्ये वयम् अतीतस्य कथाः वर्णयामः, ते दिनाङ्कत्वेन महत्त्वपूर्णाः न भवन्ति परन्तु ते एतस्मात् कारणात् महत्त्वपूर्णाः भवन्ति यतो हि काश्चन विशिष्टाः घटनाः एतेषु दिनाङ्केषु अभवन् इति दृष्ट्या एते महत्त्वपूर्णाः इति मत्वा वयं व्यवहरामः । यदि अध्ययनस्य विषयः परिवर्तितः भवति, यदि वयं नूतनविषयेषु अवधानं कुर्मः तर्हि तस्यां स्थितौ महत्त्वपूर्णदिनाङ्काः अपि परिवर्तन्ते ।

कस्मिंश्चित् उदाहरणे विचारयन्तु । भारते ब्रिटिशैः इतिहासकारैः यः इतिहासः लिखितः तस्मिन् प्रत्येकं राष्ट्राध्यक्षस्य (गवर्नरजनरल) इत्यस्य शासनकालः महत्त्वपूर्णः अस्ति । एषः इतिहासः राष्ट्राध्यक्षस्य वारैनहेस्टिंग्सस्य शासनात् आरभते स्म । विभिन्नेषु अध्यायेषु वयम् अपरेषां राष्ट्राध्यक्षाणां (गवर्नरजनरल तेषु च हेस्टिंग्स-वेलेज्ली-बेटिंक-

डलहौजी-कैनिंग-लारेंस-लिटन-रिपन-कर्जन-हार्डिंग-इरविनानां विषये अपि पठामः । अस्मिन् इतिहासे राष्ट्राध्यक्षाणां वायसराय इत्येतेषां च कदापि असमाप्यमानक्रमः एव अजस्रं चलति स्म । इतिहासस्य एतेषु पुस्तकेषु सर्वेषां दिनाङ्कानां महत्त्वस्य निर्धारणम् एतेषाम् अधिकारिणां तेषां गतिविधीनां नीतीनाम् उपलब्धीनां च आधारेण भवति स्म । एषः निश्चयः एतस्मात् कारणात् भवति स्म यतोहि एतेषां जनानां जीवनात् बहिर्भूतं किमपि तादृशं नासीत् यस्य अवगमनं महत्त्वपूर्णं स्यात् इति । एतेषां ब्रिटिश- राष्ट्राध्यक्षादीनां (गवर्नरजनरल ) जीवन-क्रमः ब्रिटिशभारतस्य इतिहासे पृथक्-पृथगध्यायानां विषयः भवति स्म ।

किं वयं तदानीन्तनकालस्य इतिहासं पृथक्तया न वर्णयितुं शक्नुमः ? राष्ट्राध्यक्षाणाम् (गवर्नर-जलरल) इतिहासस्य परिप्रेक्ष्ये वयं भारतीयसमाजस्य विभिन्नसमूहानां वर्गाणां च गतिविधिषु कथम् अवधानं कर्तुं शक्नुमः ?

यदा वयम् इतिहासम् अथवा कामपि कथां लिखामः तर्हि तां कथां वयं खण्डेषु अथवा अध्यायेषु विभाजयामः । वयम् एतत् विभाजनं किमर्थं कुर्मः ? एतत् विभाजनम् अनया दृष्ट्या क्रियते यतः प्रत्येकस्मिन् अध्याये किञ्चित् सामञ्जस्यं स्यात् । एतस्य एतत् उद्देश्यम् अस्ति यत् कथा जनानां पुरतः तेन क्रमेण आगच्छेत् येन जनाः तां कथां सरलतया बोद्धुं स्मर्तुं चापि पारयेयुः । एतस्यां प्रक्रियायां वयं केवलं ताः घटनाः उद्दिश्य एव बलाघातं कुर्मः, याः घटनाः तां कथां प्रस्तोतुं सहायभूताः भवन्ति । यः इतिहासः राष्ट्राध्यक्षाणां (गवर्नर-जलरल) जीवनाधारितः तेषां राष्ट्राध्यक्षाणां सन्दर्भे च भवति तस्मिन् इतिहासे भारतीयानां गतिविधयः महत्त्वं न दधति । तेषां कृते तत्र किमपि स्थानं न भवति । पुनः एतस्याम् अवस्थायां किं वा कर्तुं शक्येत ? स्पष्टमस्ति अस्माभिः स्वीयस्य इतिहासस्य किञ्चित् पृथक्-प्रारूपं रचनीयं भविष्यति । एतस्य अयम् अभिप्रायः अस्ति यत् अधुना यावत् अस्माकं दृष्टौ ये दिनाङ्काः महत्त्वपूर्णाः आसन् ते अधुना महत्त्वपूर्णाः न सन्ति । अस्माकम् अभिमता नूतनदिनाङ्काः महत्त्वपूर्णाः भविष्यन्ति ।



**चित्रम्** ३ – वॉरेनहेस्टिंग्सः १७७३तमवर्षे भारतस्य प्रथमराष्ट्राध्यक्षः जातः ।

इतिहासस्य पुस्तकेषु राष्ट्राध्यक्षाणां (गवर्नर-जलरल) कार्याणि तेषां राष्ट्राध्यक्षाणां च जीवनचरित्रेषु तेषां गौरवगाथाः छायाचित्रेषु च तेषां प्रकृष्ट-वैयक्तित्वानि अपि वर्ण्यन्ते स्म ।

## वयं कालावधीनां निर्धारणं कथं कुर्मः ?

१८१७तमे वर्षे स्कॉटलैण्डस्य अर्थशास्त्री राजनीतिज्ञः दार्शनिकः च जेम्समिलः त्रिषु विशालखण्डेषु “ए हिस्ट्री ऑफ ब्रिटिश इण्डिया” (ब्रिटिशभारतस्य इतिहासः) इति पुस्तकम् अलिखत् । एतस्मिन् पुस्तके सः भारतीयेतिहासस्य हिन्दु-मुस्लिम-ब्रिटिश-दृष्ट्या त्रिषु कालखण्डेषु विभाजनं कृतवान् । कालखण्डानाम् एतत् निर्धारणम् अधिकतराः जनाः अमन्यन्त अपि । किं भवद्भिः अस्मिन् भारतीयेतिहास-बोधनक्रमे कापि समस्या दृश्यते ?

वयं पृथक्-पृथक्-कालखण्डेषु किमर्थम् इतिहासं विभाजयितुं प्रयासं कुर्मः ? एतस्य विभाजनस्य अपि किञ्चित् विशिष्टं कारणम् अस्ति । वयं कस्यचित् कालखण्डस्य वैशिष्ट्यानि केन्द्रीयतत्त्वानि च ग्रहीतुं प्रयत्नं कुर्मः । अतः एतादृशाः शब्दाः महत्त्वपूर्णाः भवन्ति येषां माध्यमेन वयं समयस्य विभाजनं कुर्मः । एते शब्दाः अतीतस्य विषये अस्माकं विचारान् दर्शयन्ति । एते एव शब्दाः अस्मान् ज्ञापयन्ति यत् एकस्मात् कालावधेः आरभ्य अन्यकालावधिपर्यन्तं मध्ये जातानां परिवर्तनानां किं महत्त्वम् अस्ति ? इति ।

मिलवर्यः अनुभवति स्म यत् सर्वे एशिया-भूभागीयाः समाजाः सभ्यतायाः विषये यूरोपस्य अपेक्षया पृष्ठे वर्तन्ते । अत्रत्येतिहास्य विषये तस्य मिलवर्यस्य ज्ञानम् एतादृशम् आसीत् यत् भारते आङ्ग्लीयानाम् आगमनात् पूर्वम् अत्र हिन्दु-मुस्लिम-शासकैः एव शासनं क्रियते स्म । अत्र सर्वत्र धार्मिकविद्वेषस्य जातिगतबन्धनानां कुरीतीनाम् अन्धविश्वासानां च एव प्रसारः आसीत् ।

### ➤ गतिविधिः

स्वाम्बया कुटुम्बस्य च केनचित् अन्यसदस्येन सह वार्त्तालापं कृत्वा तेषां जीवनस्य विषये अवजानन्तु । अधुना तेषां जीवनं पृथक्-पृथक् कालखण्डेषु विभाजयन्तु, प्रत्येकं कालावधौ घटित-महत्त्वपूर्ण-घटनानां सूचीं निर्मान्तु । स्पष्टयन्तु यत् भवद्भिः कालखण्डाः केन प्रकारेण निर्धारिताः ।

मिल-महोदयस्य दृष्ट्या ब्रिटिशशासनेन भारतं सभ्यतायाः मार्गे नेतुं शक्यते। एतस्मै कार्याय आवश्यकम् आसीत् यत् भारते यूरोपस्य शिष्टाचाराः, कलाः, संस्थानानि, अधिनियमाः च प्रवर्तनीयाः इति। मिलमहोदयः तु तथाविधं परामर्शम् अपि अददात् यत् आङ्ग्लीयैः भारतस्य सम्पूर्णभू-भागस्य अधिग्रहणं करणीयं येन भारतीयजनता ज्ञानं सुखिजीवनं च प्राप्तुं समर्था स्यात्। तस्य मिलवर्यस्य मान्यता आसीत् यत् आङ्ग्लीयानां साहाय्यं विना भारतस्य प्रगतिं विकासं च न कश्चिदपि कर्तुं शक्नोति ?

इतिहासस्य एतस्यां धारणायाम् आङ्ग्लशासनं प्रगतेः सभ्यतायाः च प्रतीकभूतम् आसीत्। आङ्ग्लशासनात् प्राक् अत्र सम्पूर्णतया अन्धकारमयी स्थितिः आसीत्। किम् एतादृशी धारणा स्वीकर्तुं शक्यते ?

किम् इतिहासस्य एतं कालं "हिन्दु-मुस्लिमकालः" इति वक्तुं शक्नुमः ? किम् एतेषु सर्वेषु कालखण्डेषु अनेकप्रकारकाः धर्माः सहैव न चलन्ति स्म ? कस्यचित् युगस्य निर्धारणस्य तात्कालिकशासकानां धर्मस्य अनुसारं निश्चयस्य का आवश्यकता अस्ति ? यदि वयम् एवं कुर्मः तर्हि एतस्य अभिप्रायः अस्ति यत् इतरेषाम् अर्थात् सामान्यजनानां जीवनयापनशैल्याः किमपि महत्त्वं न भवति इति। अस्माभिः स्मर्तव्यं यत् प्राचीनभारते सर्वेषां शासकानाम् अपि एक एव धर्मः न भवति स्म।

आङ्ग्लीयैः बोधितवर्गीकरणात् पृथक्-भूत्वा इतिहासकाराः भारतीयेतिहासं सामान्येन प्राचीन-मध्यकालीनाधुनिक-कालेषु विभागं कृत्वा पश्यन्ति । एतस्य विभाजनस्य पृथक् स्वीयाः समस्याः सन्ति। इतिहासस्य अनेन प्रकारेण विभाजनस्य दृष्टिः अपि पश्चिमतः आगता अस्ति । पश्चिमदेशेषु "आधुनिककालः" विज्ञान-तर्क-लोकतन्त्र-मुक्ति-समानता-सदृशानाम् आधुनिक-शक्तीनां विकासस्य युगं मन्यते। तेषां दृष्टौ मध्यकालीनसमाजाः ते समाजाः आसन् यत्र आधुनिकसमाजस्य एताः विशेषताः नैव आसन्। किं वयं स्वाध्यायाय अध्ययनाय वा आधुनिककालस्य एताम् अवधावरणाम् अज्ञात्वा एव अङ्गीकर्तुं शक्नुमः ? यथा भवन्तः एतस्मिन् पुस्तके द्रक्ष्यन्ति, आङ्ग्लशासने जनेषु समानता स्वतन्त्रता मुक्तिश्च च आसीत्। न चैव अयम् आर्थिकविकासस्य प्रगतेः च कालः आसीत्।

बहवः इतिहासकाराः एतत् युगम् "औपनिवेशिकयुगम्" इति कथयन्ति।

## "औपनिवेशिकम्" इति किं भवति ?

एतस्मिन् पुस्तके भवन्तः पठिष्यन्ति यत् केन प्रकारेण आङ्ग्लीयैः अस्माकं देशः जितः, स्थानीयशासकान् नृपान् च पराभूय स्वशासनं स्थापितम्। भवन्तः द्रक्ष्यन्ति यत् कथं तैः अर्थव्यवस्थायां समाजस्य च उपरि नियन्त्रणम् अपि स्थापितम्, स्वीयानां सम्पूर्णावश्यकतानां पूर्तये धनव्यवस्थां ते राजस्वं गृहीत्वा अकुर्वन्, स्वावश्यकतानां पूर्तये ते नित्योपयोगिवस्तूनि न्यूनमूल्येन क्रीतवन्तः। ते निर्याताय महत्त्वपूर्णसस्यानां कृषिकार्यं कारितवन्तः तथा च एतेषां सर्वेषां प्रयासानां कारणात् कानि परिवर्तनानि आगतानि ? भवन्तः एतदपि एतस्मिन् पुस्तके अवगमिष्यन्ति यत् ब्रिटिशशासनस्य कारणात् अत्रत्येषु मूल्येषु मान्यतासु रुचिषु अरुचिषु रीतिषु जीवनशैल्यां च कानि कानि परिवर्तनानि जातानि ? यदा एकस्मिन् देशे अन्यदेशस्य प्रभावेण एतादृशानि राजनैतिकानि आर्थिकानि सामाजिकानि सांस्कृतिकपरिवर्तनानि च जायन्ते तदा एषा प्रकिया एव "औपनिवेशीकरणम्" इति उच्यते।

परन्तु शीघ्रमेव भवन्तः एतदपि अवगमिष्यन्ति यत् सर्वे वर्गाः एतानि उपर्युक्तानि चर्चितपरिवर्तनानि समानदृष्ट्या एव न अनुभवन्ति स्म । अतः एतस्य पुस्तकस्य नाम अस्माकम् अतीताः (अर्थात् अनेकेषु अतीतेषु केन्द्रितम्) इति कृतम् अस्ति ।

## वयं कथं जानीमः ?

भारतीयस्य इतिहासस्य अतीतानां सार्द्धद्विशत-वर्षाणाम् इतिहासं लेखितुम् इतिहासकाराः केषां स्रोतसां प्रयोगं कुर्वन्ति ?

## "प्रशासनम्" अभिलेखान् सज्जीकरोति

आङ्ग्लशासनेन सज्जीकृताः सर्वकारीयाः अभिलेखाः इतिहासकाराणां महत्त्वपूर्ण-साधनभूताः भवन्ति स्म । आङ्ग्लीयानाम् अभिमतम् आसीत् यत् तथ्यानां लेखनं बहुमहत्त्वपूर्णं भवति इति । तदर्थं प्रत्येकं निर्देशस्य योजनायाः नीतिगतनिर्णयानां सहमतेः निरीक्षणस्य च सुस्पष्टतया लेखनम् आवश्यकम् आसीत् । एतस्मात् कार्यात् पश्चात् तथ्यानां सम्यक्प्रकारेण अध्ययनं कर्तुम् एवञ्च तथ्येषु वादविवादः अपि कर्तुं शक्यते । तथ्यानाम् बोधे सति ज्ञापन-टिप्पणी-प्रतिवेदनानि आधारीकृत्य शासनस्य संस्कृतिः प्रादुर्भूता ।

आङ्ग्लीयाः इदमपि अनुभवन्ति स्म यत् समस्तप्रमुखाभिलेखानां पत्राणां च सावधानं स्थापनम् आवश्यकम् अस्ति । अनया दृष्ट्या ते सर्वेषु शासकीयसंस्थानेषु अखिलेखकक्षान् (रिकार्ड-रुम) अपि निर्मापितवन्तः । उपमण्डलीयकार्यालयानां मण्डलायुक्तस्य जनपदायुक्तस्य कार्यालयानां प्रान्तीयसचिवालयानां न्यायालयानां च स्वस्य पृथक् पृथक् अखिलेखकक्षाः भवन्ति स्म । महत्त्वपूर्णाभिलेखान् संरक्षयितुं अभिलेखागार- (आर्काइव) सङ्ग्रहालयसदृशानि संस्थानानि च निर्मापितानि ।

एकोनविंशतिशताब्द्याः आरम्भे प्रशासनस्य एकस्याः शाखातः अपरशाखां प्रति प्रेषितपत्राणि ज्ञापनानि च भवन्तः अद्यापि अभिलेखागारेषु द्रष्टुं शक्नुवन्ति । तत्र भवन्तः जनपदीयाधिकारिभिः सज्जीकृतानि पत्राणि सज्जीकृताः समाख्याः (रिपोर्ट्) च अपि पठितुं शक्नुवन्ति अथवा वरिष्ठाधिकारिभिः प्रान्तीयाधिकरिभ्यः दत्तान् निर्देशान् परामर्शान् चापि द्रष्टुं शक्नुवन्ति । एकोनविंशशब्दाब्द्याः आरम्भिकवर्षेषु एतेषाम् अभिलेखानां सावधानं समाख्याः (नकलें) निर्मीयन्ते स्म ।

अभिलेखान् कुशलसुलेखकाः लिखन्ति स्म । सुलेखकाः (खुशनवीसी) ते जनाः भवन्ति स्म ये व्यवस्थितप्रकारेण सुलेखेन च तथ्यानि लिखन्ति । एकोनविंशतिशताब्द्याः



**चित्रम् ४** – "भारतीय-राष्ट्रिय-अभिलेखागारम्"१९२०तमे दशके निर्मितम् ।
यदा नवदेहल्याः निर्माणम् अभवत् तदा राष्ट्रिय-सङ्ग्रहालयः राष्ट्रियाभिलेखागारम् च इति द्वे एव वायसरायस्य निवासस्य समीपे निर्मापिते आस्ताम् । एतस्मात् ज्ञायते यत् आङ्ग्लीयानां दृष्टौ एतयोः संस्थानयोः कियत् महत्त्वम् आसीत् ।

स्रोतः -१

### गृहविभागाय प्रेषितसमाख्या

१९४६ तमवर्षे भारतस्य औपनिवेशिकसर्वकारः राजकीय-भारतीय-नौसेनायाः पोतेषु सैनिकानां विद्रोहं शमयितुं प्रयतते स्म । तस्मिन् काले विभिन्न-पत्तनेभ्यः गृहविभागः यां समाख्यां प्राप्नोति स्म तस्याः कानिचन उदाहरणानि इत्थं सन्ति –

**बम्बयीमहानगरम्** – एषा व्यवस्था कल्पिता अस्ति यत् सेना पोतानां कार्यालयानां च अधिग्रहणं कुर्यात् । राजकीयाः नौसैनिकपोताः अधुना अपि पत्तनेभ्यः बहिः सन्ति ।

**कराचीनगरम्** – ३०१विद्रोहिणः निगडिताः सन्ति । केचन अन्ये सन्देहास्पदविद्रोहिनः अपि निगृहीताः सन्ति ---सर्वे कार्यालयाः सैन्यनिरीक्षणे सन्ति ।

**विशाखापटनम्**- स्थितिः सर्वथा नियन्त्रणे एव अस्ति कस्यापि क्वापि हिंसा न अभवत् । पोतेषु प्रतिष्ठानेषु च सैन्यसुरक्षाकर्मिणः नियुक्ताः सन्ति । कुत्रापि चिन्ताजनक-स्थितेः सम्भावना नास्ति परन्तु कदाचित् एतत् भवितुं शक्नोति यत् केचन सैनिकाः कार्यक्षेत्रं न आगच्छेयुः इति ।

डायरेक्टर-आफ-इंटेलिजेंस, हेडक्वार्टर, इण्डिया-कमाण्ड, सिचुएशन-रिपोर्ट सं -७,
फाइल-सं,५/२१/४६
गृह (राजनैतिकम्),भारतसर्वकारः ।

मध्यकालं यावत् मुद्रण-प्रविधिः अपि विकसितः आसीत् । एतस्य प्रविधेः आधारेण अधुना प्रत्येकं सर्वकारिविभागस्य क्रियान्वयितानाम् अभिलेखानाम् अनेकाः प्रतयः निर्मातुम् आरब्धाः ।

## सर्वेक्षणस्य वर्धमानं महत्त्वम्

औपनिवेशिकशासनस्य काले सर्वेक्षणस्य प्रचलनमपि कालक्रमेण महत्त्वभूतम् अभवत् । आङ्ग्लीयानां विश्वासः आसीत् यत् कस्मिन्नपि देशे सुप्रकारेण शासनं सञ्चालयितुं तस्य देशस्य विषये समीचीनावगमनम् आवश्यकं भवति । एकोनविंशशताब्द्याः आरम्भिककालं यावत् सम्पूर्णदेशस्य मानचित्रस्य सज्जीकरणाय महान्ति सर्वेक्षणानि आरब्धानि । ग्रामेषु राजस्वसर्वेक्षणानि कृतानि । एतेषां सर्वेक्षणानाम् उद्देश्यम् आसीत् भूमेः तलस्य मृदायाः गुणवत्तायाः तत्र प्राप्यमाणानां पादपानां जीवजन्तूनां स्थानीयेतिहासस्य सस्यानां च विषये ज्ञानं भवेत् । आङ्ग्लीयानां दृष्टौ कस्मिंश्चित् भूभागे शासनं करणीयं तर्हि उपर्युक्तानां सर्वेषां विषयाणाम् अवगमनम् आवश्यकम् आसीत् । एकोनविंशतिशताब्द्याः अन्तिमकालखण्डात् प्रत्येकस्मिन् दशसु वर्षेषु जनगणनाकार्यम् अपि आरब्धम् । जनगणनायाः माध्यमेन भारतस्य सर्वेषु प्रान्तेषु निवसतां जनानां सङ्ख्यायाः तेषां जातेः क्षेत्रस्य व्यवसायस्य च विषये अपि सूचनाः एकत्रीक्रियन्ते स्म । एतदतिरिच्य वानस्पतिकानि प्राणिवैज्ञानिकानि पुरातात्त्विकानि मानवशास्त्रसम्बद्धानि वनसम्बद्धानि च सर्वेक्षणानि बहूनि च अन्यानि अपि सर्वेक्षणानि क्रियन्ते स्म ।

## अधिकृताभिलेखैः किं न ज्ञायते ?

अभिलेखानाम् अस्मात् विशालभाण्डागारात् वयं बहुकिमपि अवगन्तुं शक्नुमः । पुनरपि एतस्य तथ्यस्य अवहेलनं न कर्तुं शक्यते यत् एते सर्वे सर्वकारीयाः अभिलेखाः सन्ति इति ।



**चित्रम् ५ -**
शरीफे इत्यस्य पादपः,
१७७० तमदशकः ।

आङ्ग्लीयैः सर्जितेषु वानस्पतिकोद्यानानां प्राकृतिकेतिहास-सङ्ग्रहालयानां च विभिन्नपादपानां चित्राणि तेषां सम्बद्धसूचनाः च एकत्रीक्रियन्ते स्म । एतानि चित्राणि स्थानीयशिल्पकारैः निर्माप्यन्ते स्म । अधुना इतिहासकाराः एतस्मिन् विषये ध्यानकेन्द्रितं कुर्वन्ति यत् एतादृशी सूचनाः कथम् एकत्रीक्रियते स्म, अपि च अनेन उपनिवेशवादस्य विषये किं ज्ञायते ।



**चित्रम् ६** – *बङ्गप्रान्ते मानचित्रणस्य सर्वेक्षणस्य च कार्यं चलति । जेम्सप्रेंसेपवर्येण रचितं किञ्चित् चित्रम्,१८३२. ।*
सावधानं पश्यन्तु, सर्वेक्षणे प्रयुक्तानि सर्वाणि चित्राणि अग्रिमभागे दर्शितानि सन्ति । चित्रकारः एतस्याः परियोजनायाः वैज्ञानिकस्वरूपे विशेषतया बलाघातम् इच्छति ।



**चित्रम्** -*१८५७ तमवर्षस्य विद्रोहिणः ।*

चलचित्राणि सावधानं द्रष्टव्यानि । तैः वयं चित्रकारस्य चिन्तनम् अवगच्छामः । १८५७ तमवर्षस्य विद्रोहात् पश्चात् आङ्ग्लीयैः सज्जीकृतेषु सचित्रपुस्तकेषु एतत् चित्रम् अनेकेषु स्थानेषु दृश्यते । एतस्य छायाचित्रस्य अधः लिखितं भवति स्म "विद्रोहिणः सैनिकाः सर्वत्र लुण्ठने संलग्नाः सन्ति ।" आङ्ग्लीयानां दृष्टौ विद्रोहीजनता लोभसमन्विता दुष्टा दयारहिता च आसीत् । अस्य विद्रोहस्य विषये भवन्तः पञ्चमाध्याये पठिष्यन्ति ।

एतेभ्यः अभिलेखेभ्यः वयम् एतदेव अवगन्तुं शक्नुमः यत् सर्वकारीयाः अधिकारिणः किं चिन्तयन्ति स्म ? केषु विषयेषु वस्तुषु च तेषां रुचिः आसीत्, तथा च अनन्तरकालाय ते कानि कानि वस्तूनि संरक्ष्य स्थापयितुम् इच्छन्ति स्म ? वयम् एतैः अभिलेखैः इदं बोद्धुं सदैव मार्गदर्शनं न प्राप्नुमः यत् देशस्य अपरेषु भागेषु विद्यमानाः जनाः किम् अनुभवन्ति स्म इति, तेषां क्रियान्वयनस्य च किं कारणम् आसीत् ?

एतानि तथ्यानि अवगन्तुम् अस्माभिः कुत्रचित् अन्यत्र परिशीलनीयं भविष्यति । यदा वयम् एतादृशानाम् अपरेषां स्रोतसाम् अन्वेषणम् आरभामहे तदा वयं विविधश्रोतांसि प्राप्तुं शक्नुमः । परन्तु सर्वकारीयानाम् अभिलेखानाम् अपेक्षया तेषां निजाभिलेखानाम् अन्वेषणं किञ्चित् कठिनमिति भवति । अनया दृष्ट्या जनानां दैनन्दिन्याम् उल्लिखितानि तथ्यानि तीर्थयात्राणां यात्रिणां च संस्मरणानि महत्त्वपूर्णजनानाम् आत्मकथाः स्थानीयमहाहट्टेषु विक्रीयमाणानि पुस्तकानि टिप्पणीपुस्तिकाः च अपि महत्त्वपूर्णाः भवन्ति । कालक्रमेण यथा टङ्कनस्य प्रविधिः प्रकाशपथम् आगतः, तथा वार्तापत्राणि मुद्रयितुम् आरब्धानि, विभिन्नेषु च विषयेषु जनतायाः मध्ये वादाः विवादाः च अपि अभवन् । नेतारः समाजसुधारकाः च स्वविचारान् चिन्तनं च जनेषु प्रसारयितुम् अलिखन्, कवयः उपन्यासकाराः च स्वभावनाः विचारान् च अभिव्यङ्क्तुं लेखितवन्तः ।

परन्तु एतानि सर्वाणि श्रोतांसि ते जनाः रचितवन्तः ये जनाः पठितुं लेखितुं च न जानन्ति स्म । परन्तु एतेभ्यः स्रोतोभ्यः वयम् इदं न अवबोद्धुं शक्नुमः यत् आदिवासिनः कृषकाः आकरश्रमिकाः राजमार्गाणां वास्तव्याः निर्धनाः च किम् अनुभवन्ति स्म इति ?

यदि वयं किञ्चित् इतोऽपि प्रयत्नं कुर्याम तर्हि एतस्मिन् विषये आधिक्येन ज्ञातुं शक्नुमः । कालक्रमेण यथा भवन्तः पुस्तकीयज्ञानेन विकसिताः भविष्यन्ति तथा एतत् तथ्यम् अवगन्तुं सारल्यम् अनुभविष्यन्ति ।

### "मनुष्याणां "भक्ष्यं" नास्ति"

समाचारपत्रैः देशस्य विभिन्नेषु भागेषु जातान्दोलनानां विषये ज्ञायते । अत्र १९४६ तमवर्षे आरक्षि- कार्यबहिष्कारस्य वार्त्ता अत्र प्रकाशिता अस्ति ।

देहल्यां द्विसहस्राधिकाः आरक्षकाः बृहस्पतिवासरे प्रातःकाले प्राप्यमाणं स्वन्यूनवेतन अथ च पुलिसलाइन्सपाकशालातः प्राप्यमाणं निम्नगुणवत्तासम्पन्नं भोजनं च विरुध्य भोजनं कर्तुं निराकृतवन्तः । यदा एतां सूचनाम् अन्यारक्षकालयस्थाः आरक्षिणः श्रुतवन्तः, तदा तत्रत्याः आरक्षकाः भोजनं कर्तुं निराकृतवन्तः--- । केषाञ्चित् कार्यबहिष्कर्तॄणां कर्मचारिणां कथनम् आसीत् यत् "पुलिसलाइन्स इत्यस्याः पाकशालातः यत् भोजनम् आयाति तत् भोजनं कश्चिदपि मनुष्यः न भोक्तुं शक्नोति इति । अस्माभिः या रोटिका द्विदलं च भोक्तव्यं भवति तत् कश्चित् पशुः अपि न भोक्तुं शक्नोति ।"

हिन्दुस्तानटाइम्सः,२२मार्चमासः, १९४६

### ➤ गतिविधिः

प्रथमं द्वितीयं च स्रोतसं पश्यन्तु । किं भवद्भिः प्रतिवेदनानां स्वरूपस्य विषये किञ्चित् वैभिन्न्यं दृश्यते । ज्ञापयन्तु यत् भवन्तः किम् वैभिन्न्यम् अनुभवन्ति ।

### आगच्छन्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु यत् भवन्तः इतिहासकाराः सन्ति इति। भवन्तः एतं विषयम् अवगन्तुम् इच्छन्ति यत् स्वतन्त्रतायाः प्राप्तेः पश्चात् कस्यचित् दुर्गमादिवासिक्षेत्रस्य कृषिकार्ये कानि परिवर्तनानि जातानि सन्ति ? एताः सूचनाः अन्वेष्टुं विभिन्नानाम् उपायानां सूचीं कुर्वन्तु।

## पुनः स्मरन्तु -

१. उचितम् अनुचितं च ज्ञापयन्तु –

(क) जेम्समिलः भारतीयम् इतिहासम् ईसाई-हिन्दु-मुस्लिमादिरूपेण त्रिषु कालखण्डेषु विभाजितवान्।

(ख) सर्वकारीयाभिलेखेभ्यः वयम् एतं विषयम् अवगन्तुं साहाय्यं प्राप्नुमः यत् सामान्याः जनाः किं चिन्तयन्ति।

(ग) आङ्ग्लीयाः अनुभवन्ति स्म यत् समुचितप्रकारेण शासितुं सर्वेक्षणानि महत्त्वपूर्णानि भवन्ति।

## आगच्छन्तु विचारयामः –

२. जेम्समिलः भारतीयम् इतिहासं यया प्रक्रियया विभाजितवान् अस्ति तत्र काः समस्याः सन्ति ?

३. आङ्ग्लीयाः कथम् अभिलेखान् संरक्ष्य स्थापितवन्तः ?

४. इतिहासकाराः पुरातनैः वार्त्तापत्रैः याः सूचनाम् एकत्रीकुर्वन्ति, ताः सूचनाः आरक्षिसमाख्यासु उपलब्ध-समाख्याभ्यः कथं पृथक् भवन्ति ?

## आगच्छन्तु (अभ्यासं) कृत्वा पश्यामः –

५. किं भवन्तः अद्यतनस्य संसारे जातानि कानिचन सर्वेक्षणानि उदाहरणरूपेण प्रस्तोतुं शक्नुवन्ति ? चिन्तयन्तु यत् कथं क्रीडकानां निर्मातृसंस्थाः इदं जानन्ति यत् बालेभ्यः कानि क्रीडनकानि आधिक्येन रोचन्ते ? अथवा सर्वकारः कथं जानाति यत् विद्यालयेषु बालानां सङ्ख्या कियती अस्ति ? इतिहासकाराः एतादृशैः सर्वेक्षणैः किं प्राप्तुं शक्नुवन्ति ?

॥ इति प्रथमोऽध्यायः ॥